शास्त्री-II साहित्य

रघुवंशमहाकाव्यम् - चतुर्दशसर्गः

Saathi

Date __/__/____

प्र० - पद्यमिदम् व्याख्येयम् ।

सरित्समुद्रान्सरसीश्च गत्वा रक्षःकपीन्द्रैरुपपादितानि ।
तस्यापतन्मूर्ध्नि जलानि जिष्णोर्विन्ध्यस्य मेघप्रभवा इवापः ॥

उत्तरम् - प्रसंगः — प्रस्तुतोऽयं श्लोकः महाकवि कालिदासप्रणीतस्य रघुवंशमहाकाव्यस्य चतुर्दशसर्गात् उद्धृतोऽस्ति ।

प्रस्तुतश्लोके विभीषणानुचराः श्रेष्ठराक्षसाः सुग्रीवाज्ञाकारिणो वानरभटाश्च गङ्गासागरमानसरोवरादिभ्यः उपनीतानि पवित्रतमजलानि विजयिनो रामस्य मस्तके विन्ध्य पर्वतस्य मूर्ध्नि जलदा इवाभ्यवर्षन इति भावः ।

व्याख्या — रक्षःकपीन्द्रैः = राक्षसवानरश्रेष्ठैः । सरित्समुद्रान = नदीसागरान् । सरसीः = सरोवरादींश्च, गत्वा = उपेत्य । उपपादितानि = उपनीतानि । जलानि = तोयानि । जिष्णोः = जलशीलस्य । तस्य = दशरथेः श्रीरामस्य । मूर्ध्नि = शिरसि । विन्ध्यस्य = विन्ध्यपर्वतस्य । मूर्ध्नि = शिखरे । मेघप्रभवाः = जलदजा । आपः = तोयानि इव । अपतन् = अवर्षन् पातितानि ।

Renu Devi
17/08/20
राधा उमाकान्त सं० महावि० सुखसेना,
पूर्णिया ।

Page No. ____

उपशास्त्री - II साहित्य - तृतीय - पत्रम्
किरातार्जुनीय - प्रथमः सर्गः

Saathi

Date ___/___/___

प्र०(1) - पद्यमिदम् व्याख्येयम् ।
परिभ्रमंल्लोहितचन्दनोचितः पदातिरन्तर्गिरि रेणुरूषितः।
महारथः सत्यधनस्य मानसं दुनोति नो कच्चिदयं वृकोदरः॥

उत्तरम् - प्रसंगः - प्रस्तुतोऽयं श्लोकः कविकुल प्रकाण्ड पंडित महाकवि भारवि प्रणीतस्य किरातार्जुनीय महाकाव्यस्य प्रथम सर्गात् उद्धृतोऽस्ति ।
अस्मिन् श्लोके द्रौपदी युधिष्ठिरं युक्ति-संगतं कथयति। →

व्याख्या: - रक्तचन्दनाङ्गरागाभ्यासी महारथचारी चायं भीमसेनः साम्प्रतं धूलिधूसरितः सन् पदातिरेव पर्वतान्तरेषु पर्यटति, अनेनापि सत्य प्रियस्यतव मानसं न किञ्चिदपि परितप्यते किम् ।

Renu Devi
17/08/20
राधा उमाकान्त सं० महावि० सुरवसेना,
पूर्णिया ।

Page No. ____

शास्त्री – II साहित्य

अभिज्ञानशाकुन्तलम्

Date __/__/__ पञ्चमोऽङ्कः

प्र० (1) औत्सुक्यमात्रमवसादयति प्रतिष्ठा।
क्लिश्नाति लब्धपरिपालनवृत्तिरेनम् ।
नातिश्रमापनयनाय न च श्रमाय
राज्यं स्वहस्तधृतदण्डमिवातपत्रम् ॥

उत्तरम् — प्रसंगः — प्रस्तुतोऽयं श्लोकः महाकवि कालिदासप्रणीतस्य अभिज्ञानशाकुन्तलम् नाट्यकाव्यस्य पञ्चमोऽङ्कात् उद्धृतोऽस्ति अस्मिन् श्लोके उक्तमर्थमेवोपपादयति राजा दुष्यन्तः कथयति —

व्याख्या — यथा पथिकैः स्वहस्ते ध्रियमाणं छत्रं तेषां केवलमातप दुःखं दूरीकरोति न च सर्वथा श्रमापनयनं विधत्ते तथैव धृतदण्डेन राज्ञा परिपालितं राज्यं क्लेशसंमिश्रं सुखं जनयति । तस्मादुत्कृष्ठानिवृत्यवसानमेवराज्यतन्त्रम्, नातिसुखम्, नातिदुःखमिति तत्वम् ।
अत्राऽप्रस्तुतप्रशंसा-काव्यलिङ्ग विरोधाभासोपमालङ्काराः वसन्ततिलका छन्दश्च ।

Renu Devi
17/08/20
राधा उमाकान्त सं० महावि० सुखसेना, पूर्णिया ।

Page No.

उपशास्त्री-I साहित्य - तृतीय-पत्रम्

किरातार्जुनीय महाकाव्यम्

प्रथमःसर्गः

प्र०(1) — कथा प्रसंगेन जनैरुदाहृतादनुस्मृताखण्डलसूनुविक्रमः।
तवाभिधानाद् व्यथते नताननः सुदुःसहान्मन्त्रपदादिवोरगः॥

उत्तरम् = प्रसंगः — प्रस्तुतोऽयं श्लोकः महाकवि भारवि प्रणीतस्य किरातार्जुनीय महाकाव्यस्य प्रथम सर्गात् उद्धृतोऽस्ति। अस्मिन् श्लोके वनेचरः युधिष्ठिरं प्रति दुर्योधनस्य मनोव्यथा व्यक्तं करोति।

व्याख्या — कथाप्रसङ्गेन जनैः = विषवैद्यों में श्रेष्ठ जो लोग हैं उनसे। उदाहृतात् = उच्चारण किए हुए। तवाभिधानाद् = (त = ) तार्क्ष्य- और (व =) वासुकि के नाम वाले। सुदुःसहात् = अति कठोर। मंत्रपदात् = मंत्र के पद से। अनुस्मृताखण्डलसूनु विक्रमः = स्मरण किया है (आखण्डल = इन्द्र के, सूनु = भाई उपेन्द्र (विष्णु) के (विः =) पक्षी (गरुड़) के क्रम (= आक्रमण) को जिसने ऐसे। उरग इव = सर्प की तरह। कथा प्रसंगेन = गोष्ठियों के प्रसङ्ग में। जनैः = लोगों से। उदाहृताद् = कहे हुए। तव = तुम्हारे। अभिधानाद् = नाम से। अनुस्मृताखण्डलसूनु विक्रमः = स्मरण किया है (आखण्डलसूनु = इन्द्रपुत्र =) अर्जुन के विक्रम को जिसने ऐसा, (वह दुर्योधन)। नताननः (सन्) = मुँह झुकाकर। व्यथते = दुखी होता है।

Renu Devi
17/08/20

राधा उमाकान्त सं० महावि० सुखसेना, पूर्णिया।